हिमसंस्कृतवार्ता:

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-234 1 जून 22 , 2025 Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः आषाढ़कृष्णएकादशी
आषाढ़ 08 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशे अधुना प्रतिमासं न भविष्यति राजकीययोजनासु अनुदानम्, वित्तसहाय्यम् च

3 योगः स्वस्था जीवनशैली – प्रो हरेरामः त्रिपाठी मन-बुद्धि-शरीराणां सामंजस्यमेव योगाभ्यासपद्धतिः

4 भारतीयज्ञानपरम्परायां योगस्य महती भूमिका- कुलपतिः

## सुभाषितम्

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन॥
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥**

अर्थात्- योग से चित्त का, पद (व्याकरण) से वाणी का व वैद्यक से शरीर का मल, जिन्होंने दूर किया, उन मुनि श्रेष्ठ पतंजलि को मैं अंजलि बद्ध होकर नमस्कार करता हूँ।

## अन्ताराष्ट्रिय-योगदिवसः सम्पूर्णे विश्वे सोत्साहं समाचरितः



हिमसंस्कृतवार्ताः - अन्ताराष्ट्रिय-योगदिवसः सम्पूर्णे देशे सोत्साहं समाचरितः। देहरादून्-नगरस्य 'पुलिस लाइन' इति क्षेत्रे आयोजिते योगशिविरे राष्ट्रपतिः द्रौपदी मुर्मुः भागम् अगृह्णात्। विश्व-मञ्चे योगस्य प्रोत्साहने भारतस्य महत्त्वपूर्णा भूमिकां प्रकाशयन्ती सा अवदत् यत्, अधुना विश्व-समुदायः योगस्य विषये अधिकम् आदरं धारयति, येन महाद्वीपेषु जनाः तस्य लाभमपि अनुभवन्ति। लद्दाख-नगरे कार्गिल्-क्षेत्रस्य क्री-सुल्तान्-चू-क्रीडाङ्गणे अन्ताराष्ट्रिय-योगदिवसः अत्यन्तोत्साहेन आचर्यत। गोवाराज्ये मुख्यमन्त्री डा. प्रमोद सावन्तः तालीगांव-नगरस्य श्यामा प्रसाद मुखर्जी-क्रीडाङ्गणे योगदिवसस्य कार्यक्रमस्य नेतृत्वं कृतवान्। सः योगः विश्वस्य कृते भारतस्य महान् उपहारः इति च उद्घोषितवान्। गोवाराज्ये एकादशः अन्ताराष्ट्रिय-योगदिवसः वैभवेन आध्यात्मिकशक्त्या च आचर्यते। केन्द्रीय-नवीन-पुनर्नवीकरणीय ऊर्जा-राज्यमन्त्री श्रीपाद-नायकः ओल्ड्-गोवा-नगरस्य भव्य-चर्च्-कन्वेण्ट्-इति विश्वविदितस्थले उत्सवस्यास्य नेतृत्वं कृतवान्। सभाम् सम्बोधयन् सः, कथं योगः न केवलं शरीरम् अपितु मनसः आत्मनश्च पोषणं करोतीति उक्तवान्।

## अद्य योगः विश्वस्य विभिन्नेषु भागेषु वर्धमानस्य मनस्संतापस्य, अशान्तेः, अस्थिरतायाः च मध्ये शान्तेः मार्गम् प्रददाति- प्रधानमन्त्री नरेन्द्रमोदी



हिमसंस्कृतवार्ताः - प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् अद्य योगः विश्वस्य विभिन्नेषु भागेषु वर्धमानस्य मनस्संतापस्य, अशान्तेः, अस्थिरतायाः च मध्ये शान्तेः मार्गम् प्रददाति, तथा च शान्तियुतं, सन्तुलितं, सुस्थिरं च विश्वं प्रवर्तयितुं सामूहिकप्रयासस्य आह्वानम् करोति। सः अवदत् यत् योगः विश्वं संघर्षात् सहकारं प्रति नयेदिति। अस्मिन् वर्षे दिवसस्यास्य विषयवस्तुः 'योगा फ़ोर् वन् अर्थ, वन् हेल्थ' इति अस्ति।आन्ध्रप्रदेशस्य विशाखापट्टं-नगरस्य रमणीय-समुद्रतटं निकषा एकादशम् अन्ताराष्ट्रिय-योग-दिवसोत्सवम् संबोधयन् प्रधानमन्त्री अवदत् यत् योगः एकः विरामचिह्नः अस्ति यतोहि मानवजातीनां श्वासोच्छवासयोः सन्तुलनं कर्तुं, पुनः स्वस्थं भवितुं च आवश्यकं भवति। प्रधानमन्त्री अवदत् यत्, अस्मिन् वर्षे दिवसस्यास्य विषयवस्तुः 'योगा फ़ोर् वन् अर्थ, वन् हेल्थ' इति अस्ति। सः अवदत् यत् जगति योगस्य प्रसाराय, भारतं आधुनिकशोधमाध्यमेन योगविज्ञानं इतोऽपि सुदृढं करोति, यस्मिन् देशस्य प्रमुखाः चिकित्सा-संस्थाः योगविषयिक- संशोधने निरताः सन्ति ।

**प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु**

**To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp**

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## इजरायल-इरान-देशयोर्द्वन्द्वस्य नवमे दिनेपि प्रक्षेपास्त्राणां प्रहारः प्रचलति



हिमसंस्कृतवार्ताः - इजरायल-इरान-देशयोर्द्वन्द्वस्य नवमे दिनेपि प्रक्षेपास्त्राणां प्रहारः प्रचलति। इजरायल-देशेन इरान्-देशस्य परमाणु-संरचनां विरुध्य सस्य-कार्याचरणं कृतम्। इजरायलसस्यप्रवक्त्रा उक्तं यत्, मध्य-इरानदेशे क्षेपणास्त्र-भण्डारस्य, आधारभूत-संरचना-स्थलानि विरुध्य आक्रमणानां श्रृङ्खला समारब्धास्ति। क्यूम्-नगरस्य एकस्मिन् आवाससमूहे कृताक्रमणे ईरान-देशस्य एकः वरिष्ठः सेनापतिः सईद इजादी मृतः इजरायलस्य रक्षामन्त्रिणा इजरायल् कात्ज इत्यनेन उक्तं यत्, क्यूम्-नगरस्य एकस्मिन् आवाससमूहे कृताक्रमणे ईरान-देशस्य एकः वरिष्ठः सेनापतिः सईद इजादी मृतः। इस्फाहान-नगरस्य परमाणुकेन्द्रे इजरायल्-देशपक्षतः आक्रमणस्य सूचना अपि ईरानी संचार-माध्यमेन प्रदत्तास्ति । इरानस्य वायुरक्षया च अस्याक्रमणस्य प्रतिक्रिया प्रदत्ता इत्यपि उच्यते ।



## एयर्-इण्डिया इति संस्थाय नागरिक-विमानपत्तन-महानिदेशालयः निर्देशं दत्तवान् यत् गभीरतया नियमोल्लल्लंघनम् उद्दिश्य त्रयः अधिकारिणः तत्क्षणप्रभावेन निष्कासयन्तु



हिमसंस्कृतवार्ताः - नागरिक-विमानपत्तन-महानिदेशालयः एयर्-इण्डिया इति संस्थाय निर्देशं दत्तवान् यत् गभीरतया नियमोल्लङ्घनमुद्दिश्य त्रयः अधिकारिणः तत्क्षणप्रभावेन निष्कासयन्तु। आन्तरिक-अनुशासनात्मक-कार्याचरणाय च निर्देशं दत्तवान्; सहैव हि परिणामानां प्रस्तुतिः दशदिनेषु निवेदयतु इति निर्देशं दत्तवान्। एकस्मिन् वक्तव्ये, डी. जी. सी. ए. इत्यनेन उक्तम् यत् एते अधिकारिणः परिचालन-दोषाणां कृते उत्तरदायिनी स्तः ।

## वियतनामदेशस्य वुङ्ताऊनगरे भारतीयमहिलामल्लयुद्धक्रीडकैः चतुर्भिः स्वर्णपञ्चरजतपदकैः सहितं दशवर्गेषु रजतपदकं प्राप्तम्

हिमसंस्कृतवार्ताः। वियतनामदेशस्य वुङ्ताऊनगरे अण्डर-२३ एशियाई कुश्तीप्रतियोगितायां भारतीयमहिलामल्लयुद्ध क्रीडकैः चतुर्भिः स्वर्णपञ्चरजतपदकैः सह सर्वेषु १० वर्गेषु एकैकं पदकं प्राप्य दलस्य उपाधिः प्राप्ता। भारतीयक्रीडकाः उत्तमं प्रदर्शनं कृतवन्तः, प्रियांशीप्रजापतः ५० किलोवर्गे, रीना ५५ किलोवर्गे, सृष्टिः ६८ किलोवर्गे, प्रिया ७६ किलोवर्गे च स्वर्णपदकं प्राप्तवती। भारतस्य अन्ये पञ्च मल्लाः अपि अन्तिमपक्षं प्राप्तवन्तः, परन्तु अन्ततः रजतपदकेन सन्तुष्टाः भवितुम् अभवन्। तस्मिन् एव काले पुरुषस्य मुक्तशैली स्पर्धायां विक्की ९७ किलोग्रामे स्वर्णपदकं प्राप्तवान्, निखिलः ६१ किलोग्रामे, सुजीतकलकलः ६५ किलोग्रामे, जयदीपः ७४ किलोग्रामे, चन्द्रमोहनः ७९ किलोग्रामे, सचिनः ९२ किलोग्रामे च स्वर्णपदकार्थं स्वस्य मेलनं करिष्यति।

# हिमाचलप्रदेशे अधुना प्रतिमासं न भविष्यति राजकीययोजनासु अनुदानम्, वित्तसहाय्यम् च




हिमसंस्कृतवार्ताः - डॉ पद्मनाभः। शिमला। हिमाचलप्रदेशे अधुना मासिकरूपेण राजकीययोजनासु अनुदानम् च वित्तसहाय्यम् इत्येतयोः वितरणं न भविष्यति। वित्तविभागेन अगस्त् २०२३ तमे वर्षे प्रदत्तनिर्देशान् निरस्तीकृत्य पुनः प्राचीनां त्रैमासिकीं वार्षिकीं वा प्रणालीं यथापूर्वं प्रवर्तयितुं निर्णयः कृतः। विभिन्नविभागैः प्राचीनप्रणालीं यथावत् स्थापयितुं प्रस्तावाः प्रेषिताः आसन्। अग्रिमराशेः निष्कर्षणं वा तस्याः वित्तकोषस्थापने निषेधेन विभागानां कार्ये बाधा जाता। एतेषु प्रस्तावेषु निरीक्षणं कृत्वा प्रधानवित्तसचिवेन देवेशकुमारेण समस्तप्रशासनिकसचिवानां विभागाध्यक्षानां च कृते शुक्रवासरे पत्रं प्रेषितं, यत्र ८ अगस्त् २०२३ तमे तिथेः पूर्वप्रक्रियायाः पालनं करणीयमिति निर्दिष्टम्। अनेन निर्णयेन कृषि-वानिकीप्रभृतीनां योजनानां वित्तसहाय्यम् अधुना प्रतिमासं न प्रदास्यते, किंतु त्रैमासिकं वा वार्षिकरूपेण भविष्यति। विद्युतनुदानं तु अनेन निर्णयेन अप्रभावितम्। तद् यथापूर्वं प्रतिमासमेव लभ्यते। उक्तपत्रे उल्लिखितं यत् राज्ययोजनायाः अंतर्गतं सहाय्य-अनुदानं वित्तसहाय्यम् च मासिकरूपेण देयमिति पूर्वनिर्देशः निरस्तः। ८ अगस्त् २०२३ तमदिनाङ्के प्रदत्तः आदेशः अधिकारतः परित्यक्तः, येन विभागानां धनवितरणे नम्रता (लवचत्वं) अधिका जाता।

पूर्वनिर्देशे सर्वविभागानां मासिकरूपेण अनुदानं वित्तसहाय्यम् च देयमिति आदेशः आसीत्, येन विभागानां अग्रिमराशेः निष्कर्षणं तस्याः च वित्तकोषठिका निधायनं निषिद्धम्। विभागीयवित्तकोषठिका स्थापयितुं वित्तविभागस्य पूर्वमान्यता आवश्यकम् आसीत्, अर्जितं ब्याजं च राजकोषे प्रतिस्थापनीयं भवति स्म।

नवीननिर्देशानुसारं अगस्त् २०२३ तमस्य निर्देशाः त्वरितप्रभावेण निरस्ताः। विभागीयाधिकारिणः उक्तवन्तः यत् अयं निर्णयः विकासयोजनानां कार्यान्वयनाय स्वायत्तता दक्षता च अधिकं दास्यति, विशेषतः तेषु क्षेत्रेषु यत्र एककालीनं वा ऋतुपर्यवसितं वित्तनं अधिकं युक्तियुक्तं भवति।

# '१२ वर्षसेवां सम्पन्नानां जलरक्षकाणां प्रतिवेदनं वयं निर्मास्यामः, शीघ्रमेव मन्त्रिमण्डलस्य समक्षं प्रस्तुतं भविष्यति'



हिमसंस्कृतवार्ताः - शिमला। उपमुख्यमंत्री मुकेश-अग्निहोत्रिणः अध्यक्षतायां शिमलायां जलशक्तिविभागस्य उच्चस्तरीयसमीक्षा सभा कृता। सभायां जलशक्तिविभागसम्बद्ध-विविधविकासपरियोजनानां प्रगतेः विस्तृतसमीक्षा कृता । उपमुख्यमंत्रिणा विभागीयाधिकारिभ्यः निर्देशः दत्तः यत् राज्ये जलशक्तिविभागसम्बद्धाः सर्वाः लम्बिताः परियोजनाः कार्याणि च प्राथमिकतारूपेण निर्धारितसमयान्तरे सम्पन्नं कुर्वन्तु। सः अवदत् यत् जलसम्पदां समुचितं प्रबन्धनं जलापूर्तेः विश्वसनीयतां च सुनिश्चितं करणं राज्यसर्वकारस्य प्राथमिकता अस्ति।मुकेश अग्निहोत्री इत्यनेन अधिकारिणः समये समये स्वस्वक्षेत्रेषु भ्रमणं कृत्वा निरीक्षणं कर्तुं निर्देशः दत्तः। सः अवदत् यत् जनसामान्यानां समस्यानां तत्क्षणं समाधानं कृत्वा उच्चाधिकारिणं प्रति स्वप्रतिवेदनं प्रस्तूयताम्। जलजीवनमिशनस्य अन्तर्गतं केन्द्रात् ६३०० कोटिरूप्यकाणां स्वीकृतराशितः एतावता केवलं ५१०० कोटिरूप्यकाणि एव प्राप्तानि, स्वीकृतानि १२०० कोटिरूप्यकाणि च अद्यापि न प्राप्तानि। उपमुख्यमन्त्री उक्तवान् यत् एषः विषयः केन्द्रसर्वकारस्य समक्षं उत्थापितः भविष्यति। २०२४-२५ वर्षे ९२० कोटिरूप्यकाणि स्वीकृतानि परन्तु राज्येन केवलं १३७ कोटिरूप्यकाणां स्वीकृता राशिः प्राप्ता अस्ति । ७८३ कोटिरूप्यकाणां राशिः अद्यापि केन्द्रसर्वकाराद् न प्राप्ता।मुकेश अग्निहोत्री इत्यनेन उक्तं यत् जलशक्तिविभागे १२ वर्षाणि यावत् सेवां प्रदातुं ये जलरक्षकाः सन्ति तेषां प्रतिवेदनं शीघ्रमेव निर्माय मन्त्रिमण्डलस्य समक्षं प्रस्तुतं भविष्यति। मुकेश अग्निहोत्री इत्यनेन जनहितसम्बद्धानां योजनानां कार्यान्वयनस्य पारदर्शिता, प्रभावशीलता च वर्धयितुं विभागाय निर्देशः दत्तः। सः अपि अवदत् यत् सामान्यजनानाम् अबाधितरूपेण जलस्य आपूर्तिः सुनिश्चितं करणं राज्यसर्वकारस्य प्राथमिकता अस्ति, अस्मिन् विषये किमपि प्रकारस्य प्रमादः स्वीकार्यं न भविष्यति।

# HP Politics : स्थानान्तरणविषये मन्त्रिणः स्वसर्वकारे आक्षेपं कुर्वन्ति - अनुरागठाकुरः




हिमसंस्कृतवार्ताः - बिलासपुरम्। सांसदः पूर्वकेन्द्रीयमन्त्री च अनुरागठाकुरः अवदत् यत् राज्यस्य काङ्ग्रेससर्वकारे मन्त्रिणः स्थानान्तरणविषये क्रुद्धाः सन्ति। एते मन्त्रिणः स्वस्य सर्वकारस्य उपरि आक्षेपं कृत्वा तस्य कार्यप्रणालीविषये प्रश्नान् उत्थापयन्ति। उपमुख्यमन्त्री मुकेश अग्निहोत्रीं काङ्ग्रेसविधायकः च सामाजिकमाध्यमेषु प्राप्तानां मृत्युसंतर्जनानां प्रश्ने पक्षं कृत्वा सः अवदत् यत् तस्य अन्वेषणं करणीयम् परन्तु एताः संतर्जनाः अन्तः आगच्छन्ति वा बहितः आगच्छन्ति इति अपि अन्वेषणं कर्तव्यम्। सः अवदत् यत् योगक्षेत्रे देशम् अग्रे नेतुम् प्रधानमंत्री मोदी भूमिकां निर्वहति। सः अवदत् यत् कोटिशः जनाः लक्षशः कार्यक्रमेषु योगेन सह सम्मिलिताः सन्ति, योगद्वारा स्वस्थः भवितुं च कार्यं कुर्वन्ति।

सः अवदत् यत् प्रधानमन्त्रिणा मोदिना उक्तं यत् पाकस्य १० प्रतिशतं सेवनं न्यूनीकर्तव्यं येन शरीरं स्वस्थं तिष्ठति तथा च एषः अतीव महत् सन्देशः। इरानदेशे निरुद्धान् जनान् भारतं आनेतुं आरब्धस्य अभियानस्य विषये सः अवदत् यत् भारतीयान् स्वदेशं प्रति आनेतुं अपि पूर्वं प्रधानमंत्री मोदी उत्तमं कार्यं कृतवान्। संकटे निरुद्धान् जनान् सुरक्षिततया पुनः आनेतुं कार्यविधिः कृता इति सः अवदत्। सः अवदत् यत् इरान्-इजरायल-देशयोः अपि परस्परं वार्तालापः करणीयः, यतः युद्धात् बहिः गन्तुं कोऽपि उपायः नास्ति । केवलं वार्तालापैः एव बहिः गन्तुं शक्यते। इरान-इजरायलयोः युद्धस्य समाधानं शीघ्रमेव भविष्यति, यथा भारत-पाकिस्तान-सङ्घर्षस्य समाधानं जातम् ।

पूर्वकेन्द्रीयमन्त्री सांसदः च अनुरागठाकुरः उक्तवान् यत् कस्यापि क्षेत्रस्य विकासे मार्गाणां महती भूमिका भवति। अत एव ते दैवरेखाः अपि उच्यन्ते । एतत् दृष्ट्वा प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य नेतृत्वे केन्द्रसर्वकारः मार्गजालस्य सुदृढीकरणाय प्रभावी पदानि गृह्णाति। सः अवदत् यत् हिमाचले मार्गाः एव मुख्यानि परिवहनसाधनानि सन्ति। अतः चरणबद्धरूपेण सर्वे ग्रामाः मार्गैः सह सम्बद्धाः क्रियन्ते । शुक्रवासरे सायं सदरविधानसभाक्षेत्रस्य अन्तर्गतं कुठेड़ा-मोरसिंघी-क्षेत्रयोः आयोजितेषु कार्यक्रमेषु भागं ग्रहीतुं आगतः अनुरागठाकुरः अपि विकासकार्यस्य समीक्षां कृतवान्। तेन सह सदरस्य विधायकः त्रिलोकजम्वालः आसीत्।

# जलविद्युत्परियोजनासु विलम्बाय

## निर्मातृभ्यः सूचनापत्रं निर्गतं भविष्यति- मुख्यमंत्री



हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः ऊर्जाविभागाय एतादृशानां जलविद्युत्परियोजनानां निर्मातृभ्यः सूचनापत्रं निर्गन्तुं निर्देशं दत्तवान्, ये गम्भीरतापूर्वकं कार्यं न कुर्वन्ति। अपि च, याः परियोजनाः बहुवर्षेभ्यः अटन्ति। ऊर्जाविभागस्य उच्चस्तरीयसभायाः अध्यक्षतां कुर्वन् मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् परियोजनानिष्पादने अनावश्यकविलम्बेन राज्यस्य राजस्वस्य महती हानिः भवति। मुख्यमंत्रिणा उक्तं यत् यावत् समीपस्थराज्यानि भाखड़ाब्यासप्रबन्धनमण्डलस्य लम्बितावकाशस्य निस्तारणार्थं दृढं आश्वासनं न ददति तावत् राज्यसर्वकारः किशाऊ, रेणुकाजलबन्धादिषु आगामिषु परियोजनासु अग्रे न गमिष्यति। शनिवासरे सुक्खुः अवदत् यत् राज्यसर्वकारः विभिन्नेषु मञ्चेषु, पटलेषु च राज्यस्य जनानां हितस्य रक्षणाय प्रतिबद्धः अस्ति। एकस्मिन् प्रमुखे निर्णये राज्यसर्वकारेण एसजेवीएन इत्यस्मै पूर्वं आवंटितानां ३८२ मेगावाट् सुन्नी, २१० मेगावाट् लुहरी स्टेज-१, ६६ मेगावाट् धौलासिधपरियोजनानां निवृत्तेः निर्णयः कृतः। मुख्यमन्त्रिणे सूचितं यत् बीबीएमबी-संस्थायाः पम्प-भण्डारण-परियोजनानां स्थापनायै भाखड़ा-जलबन्धे ४४०३ मेगावाट्क्षमता, कोल-जलबन्धे ८७०० मेगावाट् क्षमता च चिह्निता अस्ति । अस्मिन् दिशि अग्रे गन्तुं विभागं निर्देशितवान् । अस्मिन्नवसरे मुख्यमंत्रिणः प्रधानपरामर्शकः रामसुभगसिंहः, अधोसंरचना परामर्शकः अनिलकपिलः, मुख्यमंत्रिण विशेषाधिकारी गोपालः शर्मा, राज्य विद्युत्मण्डलस्य अध्यक्षः संजयः गुप्ता, निदेशकः ऊर्जा राकेशः प्रजापतिः, प्रबंधनिदेशकः हिमाचलप्रदेशविद्युतनिगमः आबीद हुसैनसादिकः, प्रबंधनिदेशकः हिमाचलप्रदेशविद्युतसंचरणनिगमः राजीवसूदः आदयः वरिष्ठाधिकारिणः उपस्थिताः आसन्।

## योगः स्वस्था जीवनशैली - प्रो हरेरामः त्रिपाठी

# मन-बुद्धि-शरीराणां सामंजस्यमेव

## योगाभ्यासपद्धतिः - डॉ. चन्द्रगुप्तवर्णेकरः






**हिमसंस्कृतवार्ताः - नागपुरम्।** अन्ताराष्ट्रीय-योगदिवसोपलक्ष्ये शनिवासरे कविकुलगुरुकालिदास-संस्कृतविश्वविद्यालयस्य योगविज्ञानं समग्रस्वास्थ्यविभागः, राष्ट्रियसेवायोजना, क्रीडाविभागः, महिलाप्रकोष्ठः चेत्येतेषां सहकारेण मुख्यालये रामटेक इत्यत्र अन्ताराष्ट्रीययोगदिवसः आचरितः। कार्यक्रमस्य मुख्यातिथिः संस्कृतभवितव्यस्य प्रकाशकः डॉ. चन्द्रगुप्तवर्णेकरः आसीत् । कार्यक्रमस्य अध्यक्षता कुलपतिः प्रो. हरेरामत्रिपाठी अकरोत्। अतिथिनां शुभहस्तेन दीपप्रज्वलनेन कार्यक्रमस्य उद्घाटनं कृतम्। योगविभागस्य छात्रैः योगप्रदर्शनं कृतम् । परिचयः भारतीयधर्म-दर्शन-संस्कृति-संकायस्य अधिष्ठाता प्रो. कलापिनी अगस्ती अकारयत् । सः अवदत् यत् योगविज्ञानविभागेन आयोजितैः विविधैः योगशिबिरैः, योगपरामर्शकेन्द्रैः, योगविज्ञानपाठ्यक्रमैः च समाजे योगस्य प्रचारः क्रियते। योगविभागेन महिलाबालानां कृते विशेषस्य निःशुल्कयोगशिबिरस्य आयोजनं कृतम्। योगविभागस्य छात्राः अमेरिका, आस्ट्रेलिया, श्रीलङ्का, अर्जेन्टिना, सिङ्गापुर इत्यादिषु अनेकेषु देशेषु योगप्रशिक्षणं ददति। सः स्वजीवने योगस्य समावेशस्य विषये कथयन् अष्टाङ्गयोगस्य प्रतीकात्मकं महत्त्वं व्याख्यातवान् । मुख्यातिथिः डॉ. चन्द्रगुप्तवर्णेकरः अवदत् यत् जनयोगस्य प्रथमः प्रयोगः जनार्दनस्वामीना नागपुरे कृत्वा एतत् योग-आन्दोलनं प्रारब्धम्। अद्य विश्वयोगदिवसः आचर्यते, तस्य प्रवर्तकः जनार्दनस्वामी अस्ति। योगः केवलं व्यायामः एव नास्ति, एषः अभ्यासविधिः अस्ति या मनः, बुद्धिः, शरीरं चेत्येतेषां समन्वयं, संतुलनं, सामञ्जस्यं च प्राप्नोति; योगस्य निरन्तरं अभ्यासेन कौशलस्य विकासः भवति। योगः चिकित्साव्यवस्था अस्ति तथा च लोनावालानगरस्य कैवल्यधाम् इत्यत्र विशेषसंशोधनं कृतम् अस्ति; तस्य प्रयोगेषु सिद्धं परिणामः प्राप्तः । अध्यक्षीयसम्बोधने कुलपतिः प्रो.हरेरामः त्रिपाठी इत्यनेन उक्तं यत्, योगः स्वस्था जीवनशैली अस्ति, सर्वैः अपि एतत् स्वीकर्तव्यम् इति आह्वानं कृतवान्। अस्मिन् वर्षे योगदिवसस्य आदर्शवाक्यं योग-एकं पृथिवी-एकं स्वास्थ्यम् अस्ति। अस्माकं वसुधैव कुटुम्बकम् इति अवधारणायाः अनुरूपं सर्वेषां कृते शान्तिपूर्णं स्वास्थ्यं विश्वयोगदिवसस्य आदर्शवाक्यम् अस्ति। तदर्थं सर्वैः योगजीवनशैली स्वीक्रियताम् । आरोग्यार्थं प्राणायामस्य विविधरूपेषु विस्तरेण चर्चा, अभ्यासः च आवश्यकः । भारतीययोगव्यवस्था अन्ताराष्ट्रीयरूपेण मान्यताप्राप्ता अस्ति तथा च भारतीयज्ञानपरम्परायाः निधिः अस्ति । अध्यापनेन, अनुसन्धानेन, प्रकाशनेन, पाण्डुलिपिभिः च अस्य निधेः संरक्षणाय प्रयत्नाः क्रियन्ते । विभागः प्रतिवर्षं विविधकार्यक्रमैः योगस्य विज्ञानं अभ्यासं च संयोजयति । योगदिने अपि अस्य आविष्कारः भवति । योगविभागः राष्ट्रिय-अन्ताराष्ट्रीय-स्तरयोः प्रसिद्धः अस्ति । अहं गर्वेण उल्लेखयामि यत् अस्य पृष्ठतः प्रो.अगस्तीवर्यस्य तस्य दलस्य च निरन्तरं परिश्रमः अस्ति।अस्मिन् अवसरे गणमान्यजनानाम् आश्रयेण वैदर्भी त्रैमासिकं प्रकाशितम् ।कार्यक्रमस्य संचालनं डॉ. रेणुका करण्डिकर इत्यनया कृतम्, धन्यवादपत्रं च डॉ. सचिन द्विवेदी इत्यनेन कृतम्। कार्यक्रमस्य समापनं शान्तिप्रार्थनाद्वारा अभवत्।

# सर्वे नियमितरूपेण योगं कुर्वन्तु - मृत्युंजय झा

## योगविशेषज्ञेन प्रोटोकॉलयोगः,

## रेचक- पूरक- प्राणायामश्च समुपदिष्टः



**हिमसंस्कृतवार्ताः- पटना।** एकविंशतितमे जूनमासे अन्ताराष्ट्रीययोगदिवसस्य अवसरं निमित्तीकृत्य बिहारसंस्कृत-शिक्षामण्डलस्य राजकीयसंस्कृत-महाविद्यालयस्य काजीपुरस्थितस्य संयुक्ततत्त्वावधानेन महाविद्यालय-प्राङ्गणे योगदिवससमारोहः भव्यतया आयोजितः। अस्मिन् विशेषावसरे महाविद्यालयस्य प्राचार्यः डॉ. मनोज कुमार झा अवदत्- "योगः स्वास्थ्यरक्षणस्य श्रेष्ठतमं साधनम् अस्ति।" अधुनातनजीवनशैल्याः सन्दर्भे योगस्य भूमिका अत्यन्तं महत्त्वपूर्णा अस्ति। योगाभ्यासेन न केवलं शरीरं स्वास्थ्यं भवति, अपि तु मानसिकसंतुलनम् आत्मिकशान्तिं च लभ्यते। यौवनवर्गः विशेषेण योगेन संलग्नः भवेत्। बिहारसंस्कृत-शिक्षामण्डलस्य अध्यक्षः मृत्युंजय झा अवदत्- "योगं सर्वैः नियमितरूपेण कर्तव्यम्।" यदि समयाभावः अपि स्यात्, तथापि न्यूनतमे दशमिनिट्पर्यन्तं श्वास–प्रश्वास–सम्बद्ध–प्राणायामस्य अभ्यासः करणीयः। योगः अस्माकं जीवनम् अनुशासितं संतुलितं च करोति, स्वास्थ्यवर्धनाय सहायकी च भवति। योगसत्राय आमन्त्रितः योगविशेषज्ञः हृदयनारायण झा आयुषमन्त्रालयेन निर्धारित–योग–प्रोटोकॉलानुसारं सर्वान् प्रशिक्षणं दत्तवान्। तेन समुपस्थितविद्यार्थिभ्यः प्राध्यापक-वर्गाय कर्मचारिभ्यश्च प्रार्थना, गतिशीलव्यायामः, ताड़ासनं, पृष्ठासनम्, अर्धचक्रासनं, हस्तपादासनं, त्रिकोणासनं, वज्रासनं, शशाङ्कासनं, भुजङ्गासनं, अर्ध उष्ट्रासनम् इत्यादीनां योगमुद्राणाम् अभ्यासः कारितः। तेन कपालभातिः, नाड़ीशोधनप्राणायामः, भ्रामरी-प्राणायामः, शान्तिपाठः च सम्यक् पाठितः। रेचकः, पूरकः, कुम्भकः च प्राणायामः विशेषलाभकारी इति निर्दिष्टः। "स्वस्थजनानां कृते एषः स्वास्थ्यवर्धकः, रोगपीडितानां कृते रोगनिवारणाय सहायकः।" इति सः अवदत्। अस्मिन् योगसत्रे महाविद्यालयप्राचार्यः डॉ. मनोज कुमार झा, संस्कृतशिक्षामण्डलाध्यक्षः मृत्युंजय झा, सचिवः नीरज कुमार झा, ज्योतिर्वेदविज्ञानकेन्द्रस्य उपनिदेशकः डॉ. राघव नाथ झा, भवनाथ झा, विनेश कुमार सिंह झा, रामबली राम झा, आलोक राज झा, रूपेश कुमार झा, रामनारायण पासवान झा, बालेश्वर राम झा, मण्डलस्य अन्ये अपि पदाधिकारिणः कर्मचारिणश्च सम्मिलिताः। महाविद्यालयप्राध्यापकवर्गे डॉ. उमेश मिश्र झा, पण्डितः शशिकान्त निवारी शशिधर झा (प्रकाश यशस्वी संस्कृतकविः), डॉ. ज्योति कुमारी झा छात्रछात्राणां विशालसमूहश्च सक्रियं सहभागित्वं कृत्वा योगाभ्यासं कृतवान्।

# सम्पूर्णं जीवनमेव योगः



**हिमसंस्कृतवार्ताः। कुलदीपमैन्दोला। उत्तराखंड।** अन्ताष्ट्रियोगदिवसस्य अवसरे ब्रह्मलीनानन्त-श्रीविभूषित- जगद्गुरुशंकराचार्यज्योति-र्पीठाधीश्वरमाधवाश्रम- आध्यात्मयोगसंस्थानस्य आयोजने एकादशी अन्तर्जालव्याख्यानमाला सम्यक् प्रकारेण सम्पन्ना। अस्मिन् कार्यक्रमे "मानवजीवने योगस्य महत्वम्" विषयेस्मिन् विद्वद्भिः विस्तृता चर्चा कृता।कार्यक्रमस्य मुख्यातिथिरूपेण जगद्गुरुः देवादित्यानन्दसरस्वतीमहाराजः योगविषये चर्चां कुर्वन् उक्तवान् यत् — "कर्मैव योगः" इति। अतः कर्मापि योगवत् करणीयम्। विशिष्टातिथिः १००८ महामण्डलेश्वरः स्वामीरामकिशोरमहाराजः उक्तवान् यत् माधवाश्रममहाराजः योगविद् जीवनं अयापयत्। अद्य तेषां जीवनस्य अनुकरणम् अत्यावश्यकम् अस्ति।कार्यक्रमस्य संरक्षकः स्वामी शिवानन्दजी महाराजः योगस्य विविधविधिपरिप्रेक्ष्ये प्रकाशं दत्तवान्। सारस्वतातिथिः अभयचैतन्यमहाराजः उक्तवान् — "योगः केवलं शारीरिकव्यायामः न, अपि तु सम्पूर्णं जीवनमेव योगः" इति। अपरः सारस्वतातिथिः ब्रह्मचारी वसिष्ठमहाराजः योगस्य जीवनम् अध्यारोपणस्य प्रयासे बलं दत्तवान्। कल्याणस्वरूपमहाराजः अपि योगविषये विचारप्रदर्शनं कृतवान्। केशवस्वरूपमहाराजः उक्तवान् — "कुरु योगं भव निरोगः" इत्येतत् सूत्रम् अनुसर्तव्यम्।ततः कार्यक्रमस्य मुख्यवक्तृरूपेण आमन्त्रितः डॉ. आदित्यसुतारः योगं, भारतीयदर्शनं च, योगस्य विविधविषये विस्तरेण प्रकाशं दत्तवान्।कार्यक्रमे समापनसमये प्रो. जगदीशसेमवालः उक्तवान् यत् योगः भारतस्य मौलिकविधा अस्ति, च सनातनधर्मस्य मूलं योग एव।कार्यक्रमस्य संस्थानस्य च राष्ट्रीयाध्यक्षः प्रो. महेशप्रसादसिलोड़ी सारगर्भितया योगं योगसूत्रं च जीवनस्य सूत्ररूपेण व्याख्यातवान्। तेन उक्तम् यत् — यदि माधवाश्रममहाराजस्य जीवनं यावत् संघर्षमयं तावत् अस्ति, तर्हि सर्वे तेषां जीवनं यदि अनुसरन्ति चेत्, वास्तविककर्मयोगः सिध्यति।कार्यक्रमस्य संचालनं डॉ. आनन्दमोहनजोशीमहोदयेन कृतम्, अतिथीनां स्वागतं डॉ. लीलाधरभट्टारायणमहाशयेन च कृतम्। समापनकाले डॉ. आलोकसेमवालः सर्वेषाम् अतिथीनां धन्यवादं कृत्वा शान्तिपाठेन कार्यक्रमस्य विधिपूर्वकं समापनं कृतम्।

# भारतीयज्ञानपरम्परायां योगस्य महती भूमिका- कुलपतिः

## संस्कृतविश्वविद्यालये अन्ताराष्ट्रीय- योगदिवसस्य निमित्ते योगसहितं संगोष्ठी सम्पन्ना




**हिमसंस्कृतवार्ताः- अंकुश कुमारः, दरभङ्गा**
कर्णसिंहसंस्थानान्तर्गतस्य संस्कृत- विश्वविद्यालयस्य दरबारमण्डपे आयोजिताया योगविषयिकाया संगोष्ठ्याः अध्यक्षतां वहन् कुलपतिः प्रो. लक्ष्मीनिवासपाण्डेयमहोदयः अवदत्- "स्वस्थे शरीरे एव स्वस्थः मनसः वासः भवति।" अस्मिन् अन्ताराष्ट्रीय-योगदिवसस्य विशेषसन्दर्भे सः अवदत् यत् भारतीयज्ञानपरम्परायां योगस्य अत्यन्तं महत्त्वं विद्यमानम् अस्ति। प्राचीनकाले योगः प्रतिदिनं व्यवहारिकजीवने समाहितः आसीत्, परन्तु कालान्तरात् सः जनजीवनात् लुप्तप्रायोऽभवत्। इदानीं पुनरपि योगसाधनस्य लाभदायकत्वेन सर्वे जनाः लाभम् अनुभवन्ति। योगः शरीरे स्थैर्यं, सहिष्णुतां, धैर्यम्, उच्चशक्तिं च वर्धयति। मानसिकपदे एकाग्रता, शान्तिः, सन्तोषः च वृद्धिं प्राप्नुवन्ति। एतेन आत्मबलेन आन्तरिकबाह्यसमंवयः अपि साध्यते। कुलपतिना अपि उक्तं यत् योगः समत्वभावनां विकसितुं प्रेरयति। सः ज्ञानयोगं, कर्मयोगं, भक्तियोगं च विस्तरेण विवृणोत्। पाश्चात्यदेशानां संदर्भे सः अवदत् यत् ते रोगाणां विस्तारं कुर्वन्ति, भारतदेशः तु योगमार्गं जीवनाय जगति प्रदर्शितवान् अस्ति।

एतेषु वक्तव्यानां परिप्रेक्ष्ये कुलसचिवः प्रो. ब्रजेशपतित्रिपाठी महोदयः अपि योगमहत्त्वं प्रकाश्य सर्वेभ्यः योगासनेषु, क्रियासु च सहभागस्य आवाहनं कृतवान्। यम- नियमादीन् अपि सः विवृणोत्, विशेषतया सूर्यनमस्कारस्य लाभान् विशदं निरूपितवान्।

### पी. आर. ओ. निशिकान्तवर्येण कार्यक्रमवृत्तान्तः प्रदत्तः-

संगोष्ठ्याः विषयप्रवर्तनं धर्मशास्त्रविभागाध्यक्षः प्रो. दिलीपकुमारझामहोदयेन कृतम्। तेन योगं योगासनं च भारतीयसंस्कृतेः दर्शनस्य च अविभाज्यम् अङ्गम् इति प्रतिपादितम्। सः अन्ताराष्ट्रीययोगदिवसस्य अवसरं प्रति शुभाशंसनम् अपि दत्तवान्।संगोष्ठी संचालनं डॉ. यदुवीरस्वरूपशास्त्रिणा सम्पन्नम्। स्वागतवाक्यं डॉ. नवीनकुमारझावर्येण उद्घोषितम्। धन्यवादज्ञापनं राष्ट्रिय- सेवायोजना- संघटनस्य (NSS) समन्वायकः डॉ. सुधीरकुमारझा समर्पितवान्। कार्यक्रमस्य प्रारम्भे योगप्रशिक्षकद्वयं शशिभूषणगुप्तः च शशिरञ्जनकुमारश्च समुपस्थितान् पदाधिकारिणः कर्मिणश्च नानाविधानि योगमुद्राणि अभ्यासार्थं प्रशिक्षणं दत्तवन्तौ।

## कालेयां बद्दलां दी अंबरें फुहार




कालेयां बद्दलां दी अंबरें फुहार
मन मेरा नच्चणा लगेआ ।
धौलीधार बणी ऐ मुट्यार
मन मेरा नच्चणा लगेआ ।।
किण मिण किण मिण अमृत बरसै ।
मन मेरा सजणां ने मिलणे जो तरसै ।।
सूने सजणां बिना घर बार
बंगडू ऐ बजणा लगेआ
औखी बड़ी ऐ फौजियां दी नौकरी ।
मुस्कल चुक्कणी सधरां दी टोकरी ।।
सैहणा हिक्कडुयें मुस्कल वार
मना कैहजो सज्जणा लगेआ
सुपने मने मन बड़े नी सजाणे ।
उडदे पखेरुआं ने दिलडू नी लाणे ।।
कैहजो पाणा पखेरुआं ने प्यार
मना कैहजो नच्चणा लगेआ ...
सुपने मने दे माही मुक्कणा लगी पै ।
आसां दे कुमलू सुक्कणा लगी पै ।।
बिना सज्जणां दे अंगण दुआर
मना कैहजो सज्जणां लगेआ



लेखकः
शक्तिचन्द राणा
पपरोला कांगड़ा

## "विनोदकणिका"

वित्तकोषग्राहकः- यदि अहं अद्य धनादेशः वित्तकोषे संग्रहामि तर्हि कदा (clear) पारिता भविष्यति?
वित्तकोषलिपिकः- दिनत्रयानन्तरम्।
ग्राहकः- किन्तु मम धनादेशः तु पुरतः वित्तकोषस्य एवास्ति। उभौ वित्तकोषौ सम्मुखौ स्तः। तर्हि एतावत् विलम्बं किमर्थम्? 🤔
लिपिकः- कार्यप्रणाली (Procedure) आवश्यकी। चिन्तयतु कुत्रचित् गच्छन् यदि त्वं अकस्मात् श्मशानात् बहिः मृतः तर्हि भवन्तं प्रथमं गृहं नेष्यति वा? अथवा तत्रैव श्मशाने नीत्वा दहनक्रियां करिष्यति?
ग्राहकः अचेतनः अभवत्।
**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

# संस्कृतभारत्याः आवासीयप्रबोधनवर्गः सम्पन्नः – संस्कारेण, समर्पणेन च संस्कृतेन राष्ट्रनिर्माणस्य अनुपमदर्शनम्





**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला। मेरठं।**संस्कृतभारती-पश्चिमोत्तरप्रदेश-क्षेत्रस्य बालेरामब्रजभूषणसरस्वती-शिशुमन्दिरे, शास्त्रीनगरमेरठमध्ये "आवासीयप्रशिक्षणवर्गस्य" समापनसमारोहः भव्यरूपेण सफलतया सम्पन्नः। अयं वर्गः केवलं संस्कृतभाषायाः प्रचारप्रसाराय न, अपि तु भारतीयसंस्कृतेः, संगठनकार्यपद्धतेः, च संस्कृत्या राष्ट्रनिर्माणस्य च गम्भीरविषयेभ्यः समर्पितः आसीत्।अस्मिन् सन्दर्भे मेरठ-ब्रज-उत्तराखण्डप्रान्तेभ्यः आगतानां समर्पितकार्यकर्तृणां प्रेरणादायिनी उपस्थितिः सम्पूर्णं वातावरणं हर्षपूर्णं ऊर्जायुतं च कृतवती।
८ जून २०२५ तः आरभ्य २१ जून २०२५ पर्यन्तं चलिते अस्मिन् वर्गे २२ स्थलेभ्यः आगताः १०५ जनाः संस्कृतभाषायां संवादं कर्तुं नियमितम् अभ्यासं कृतवन्तः। प्रातःकालचतुर्वादनात् आरभ्य रात्रौ दशवादनपर्यन्तं सततं संस्कृतभाषायां भाषणं शिक्षणं च प्रशिक्षणार्थिभिः कृतम्। अस्मिन् वर्गे शिक्षकरूपेण प्रभाकरमणित्रिपाठी, गिरीशतिवारी, कुलदीपमैन्दोला, तरुणः, गणशिक्षकः आकाशः, रंगराजनः, विनीतः, रुद्रः, सन्तोषः, अंकितः, वीरेन्द्रः, नीलकमलः, पूनमवर्या, राजमणिः, नीरजः, सन्दीपकुमारः, अर्जुनः इत्येते शिक्षायै च व्यवस्थायै च सहयोगं कृतवन्तः।
वर्गस्य मार्गदर्शनार्थं संस्कृतभारत्याः विभिन्नपदाधिकारिणः समये समये आगत्य विविधेषु विषयेषु स्वविचारं प्रस्तुतवन्तः ।
एकता-विषये श्रीशदेवपुजारी-महोदयः सारगर्भितं भाषणं कृत्वा अवदत् — "एकता एव समाजस्य शक्तिः। संस्कृतभाषा अस्याः एकतायाः आधाररूपेण वर्तते।"

### संगठन-कार्यविषये जयप्रकाश-महोदयेन उक्तम् —

"संगठनेनैव समाजस्य उत्थानं साध्यते। यदा वयं संगठिताः भवामः, तदा राष्ट्रनिर्माणस्य प्रक्रिया सुदृढा भवति।"

### योग-विषये प्रेमचन्द्रशास्त्री-महोदयेन उक्तं —

"योगः भारतीयसंस्कृतेः अमूल्यं दानम् अस्ति। सः केवलं शारीरिकव्यायामः न, अपि तु आत्मा-परमात्मनः मिलनस्य मार्गः अपि अस्ति।"

### संस्कृतस्य महत्वे श्रीराम-महोदयेन निगदितम् —

"संस्कृतं केवलं भाषा न, अपि तु भारतस्य चेतना च विज्ञानस्य मूलधारा च अस्ति। अस्याम् एव विज्ञानम्, गणितम्, व्याकरणम्, चिकित्सायाः ज्ञानम्, तथा आध्यात्मिकविचाराः अपि समाहिताः सन्ति।"
समापन-सत्रे अखिलभारतीय-शिक्षणप्रमुखः श्रीराम-महोदयः प्रेरणादायकं भाषणं दत्त्वा उक्तवान् — "संस्कारैः, समर्पणेन च संस्कृतभाषया सह राष्ट्रस्य च विश्वस्य च कल्याणं सम्भाव्यते। एषा भाषा अस्मान् स्वमूलम् उपनयति, जीवनं च सुसंस्कृतं करोति।"
वर्गे क्षेत्रीय-संगठनमन्त्री श्रीदेवेन्द्रपण्ड्या-महोदयेन कार्यकर्तॄन् सम्बोध्य एवमुक्तम् —"संस्कृतभाषा केवलं भाषा न, किन्तु भारतस्य आत्मा एव। अस्याः पुनरुत्थानेन राष्ट्रस्य वास्तविकम् उत्थानम् सम्भवम्।"
कार्यक्रमस्य गरिमावृद्ध्यर्थम् संस्कृतभारत्याः मेरठ-प्रान्त-अध्यक्षः आचार्यः श्रीवाचस्पतिमिश्र-महोदयः, प्रान्त-संगठनमन्त्री (मेरठतः) श्रीयोगेशविद्यार्थी-महोदयः, प्रान्त-संगठनमन्त्री (उत्तराखण्डतः) श्रीगौरवशास्त्री-महोदयः, व्रजप्रान्ततः गौरवः,वर्गाधिकारी श्रीराजगोपालकात्यायनवर्यः, प्रशिक्षणप्रमुखः श्रीरामः महोदयः च अपि स्वविचारान् प्रस्तुतवान्।अस्मिन् विशेषसन्दर्भे प्रधान-आर्यसमाज-मेरठतः-श्रीराजेशसेठीवर्यः, वरिष्ठ-चिकित्सकः डॉ. विश्वजीत्-बैम्बी, मेरठ-दक्षिण-संयोजकः श्रीराहुलगुप्त-महोदयः, मण्डल-अध्यक्षः श्रीललित-मोरल-महोदयः, श्रीआकाशशर्मा-महोदयः, श्रीनरेन्द्रकुमार-महोदयः, डॉ. अरविन्दनारायण-महोदयः अन्ये च बहवः गणमान्य-नागरिकाः समाजसेविनश्च सादरम् उपस्थिताः आसन्।